# નાગશાન્તિસ્તોત્રમ્

Nagashantistotram

sanskritdocuments.org

October 20, 2018

# Nagashantistotram

# નાગશાન્તિસ્તોત્રમ્

## Sanskrit Document Information

Text title : Naga Shanti Stotram

File name : nAgashAntistotram.itx

Category : deities_misc

Location : doc_deities_misc

Author : Traditional

Transliterated by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyayat gmail.com

Latest update : October 20, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 20, 2018

*sanskritdocuments.org*

# નાગશાન્તિસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
શ્રી હાટકેશ્વરાય નમઃ ।
આરક્તેન શરીરેણ રક્તાન્તાયતલોચનઃ ।
મહાભોગકૃતાટોપઃ શઙ્ખાબ્જકૃતલાઞ્છનઃ ॥ ૧॥

અનન્તો નાગરાજેન્દ્રઃ શિવપાદાર્ચને રતઃ ।
મહાપાપવિષં હત્વા શાન્તિમાશુ કરોતુ મે ॥ ૨॥

સુશ્વેતેન તુ દેહેન સુશ્વેતોત્પલશેખરઃ ।
ચારુભોગકૃતાટોપો હારચારુવિભૂષણઃ ॥ ૩॥

વાસુકિર્નામ નાગેન્દ્રો રુદ્રપૂજાપરો મહાન્ ।
મહાપાપં વિષં હત્વા શાન્તિમાશુ (શાન્તિં આશુ) કરોતુ મે ॥ ૪॥

અતિપીતેન દેહેન વિસ્ફુરદ્ભોગસમ્પદા ।
તેજસાચાઽતિદીપ્તેન કૃતઃ સ્વસ્તિકલાઞ્છનઃ ॥ ૫॥

નાગરાટ્ તક્ષકઃ શ્રીમાન્નાગકોટ્યાસમન્વિતઃ ।
કરોતુ મે મહાશાન્તિં સર્વદોષવિષાવહઃ ॥ ૬॥

અતિકૃષ્ણેન વર્ણેન સ્ફુટો વિકટમસ્તકઃ ।
કણ્ઠે રેખાત્રયોપેતો ઘોરદંષ્ટ્રાયુધોદ્યતઃ ॥ ૭॥

કર્કોટકો મહાનાગો વિષદર્પબલાઽન્વિતઃ ।
વિષશસ્ત્રાગ્નિસન્તાપં હત્વા શાન્તિં કરોતુ મે ॥ ૮॥

પદ્મવર્ણેન દેહેન ચારુપદ્માયતેક્ષણઃ ।
પઞ્ચબિન્દુકૃતાભાસો ગ્રીવાયાં શુભલક્ષણઃ ॥ ૯॥

ખ્યાતઃ પદ્મો મહાનાગો હરપાદાર્ચને રતઃ ।
કરોતુ મે મહાશાન્તિં મહાપાપં વિષક્ષયમ્ ॥ ૧૦॥

પુણ્ડરીકનિભેનાઽપિ દેહેનાઽમિતતેજસા ।
શઙ્ખશૂલાબ્જરુચિરૈર્ભૂષિતો મૂર્ધ્નિ સર્વદા ॥ ૧૧॥

મહાપદ્મો મહાનાગો નિત્યં પશુપતૌ રતઃ ।
વિનિર્ધૂત(વિનિહત્ય) વિષં ઘોરં શાન્તિમાશુ કરોતુ મે ॥ ૧૨॥

શ્યામેન દેહભારેણ શ્રીમત્કમલલોચનઃ ।
વિષદર્પબલોન્મત્તો ગ્રીવાયામેકરેખયા ॥ ૧૩॥

શઙ્ખપાલઃ શ્રિયા દીપ્તઃ શિવપાદાબ્જપૂજકઃ ।
મહાવિષં મહાપાપં હત્વા શાન્તિં કરોતુ મે ॥ ૧૪॥

અતિગૌરેણ દેહેન ચન્દ્રાર્ધકૃતમસ્તકઃ ।
દીપ્તભોગકૃતાટોપઃ શુભલક્ષણલક્ષિતઃ ॥ ૧૫॥

કુલિકો નાગરાજેશો નિત્યં હરપરાયણઃ ।
અપહૃત્ય વિષં ઘોરં કરોતુ મમ શાન્તિકમ્ ॥ ૧૬॥

અન્તરિક્ષે ચ યે નાગા યે નાગાઃ સ્વર્ગસંસ્થિતાઃ ।
ગિરિકન્દરદુર્ગેષુ યે નાગા ભૂમિસંસ્થિતાઃ ॥ ૧૭॥

પાતાલે યે સ્થિતા નાગાઃ સર્વેપ્યન્યે સમાહિતાઃ ।
રુદ્રપાદાર્ચને શાન્તાઃ કુર્વન્તુ મમ શાન્તિકમ્ ॥ ૧૮॥

નાગિન્યો નાગપત્ન્યશ્ચ તથા કન્યાઃ કુમારિકાઃ ।
શિવભક્તાઃ સુમનસઃ શાન્તિં કુર્વન્તુ મે સદા ॥ ૧૯॥

યદિદં નાગસંસ્થાનં કીર્તનાચ્છ્રવણાદપિ ।
ન તં સર્પા વિહિંસન્તિ ન વિષં ક્રમતે સદા ॥ ૨૦॥

ચિન્તિતં સિધ્યતે(લભ્યતે) નિત્યં તથા પાપપરિક્ષયઃ ।
સિદ્ધિમાશુ પ્રયચ્છન્તિ સર્વવિઘ્ન વિવર્જિતાઃ ॥ ૨૧॥

ઇતિ નાગશાન્તિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Nagashantistotram*

pdf was typeset on October 20, 2018

Please send corrections to *sanskrit@cheerful.com*